# ग्रहदोषोपशमन स्तोत्र

योऽसौ वज्रधरो देवः आदित्यानां प्रयत्नतः।
सहस्रनयनः शक्रो ग्रहपीडां व्यपोहतु ॥1॥
चतुः शृंगः सप्तहस्तः त्रिपादो मेषवाहनः।
अग्निश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ॥ 2॥
यः कर्मसाक्षीलोकानां धर्मो महिषवाहनः।
यमश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु ॥ 3॥
रक्षोगणाधिपः साक्षात् प्रलयानलसन्निभः।
खड्गचर्मातिकायश्च रक्षः पीडां व्यपोहतु ॥ 4॥
नागपाशधरो देवः सदा मकरवाहनः।
वरुणोऽम्बुपतिः साक्षाद् ग्रहपीडां व्यपोहतु ॥ 5॥
प्राणरूपोहि लोकानां चारुकृष्णमृगप्रियः।
वायुश्चन्द्रोपरागोत्थग्रहपीडां व्यपोहतु ॥ 6॥
योऽसौ निधिपतिर्देवः खड्गशूलगदाधरः।
चन्द्रोपरागकलुषं धनदोऽत्र व्यपोहतु ॥ 7॥
योऽसाविन्दुधरोदेवः पिनाकी वृषवाहनः।
चन्द्रोपरागजां पीडां स नाशयतु शंकरः ॥ 8॥
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च।
ब्रह्मार्कविष्णुयुक्तानि तानि पापं दहन्तु मे ॥ 9॥